

# माकन्दमञ्जरी

(मलयालं मूलम्-'माम्पषम्'-वैलोप्पिल्लि श्रीधरमेनवः )

स्वतन्त्रसंस्कृताशयानुवादः--हरिप्रसाद्.वि.टि.कटम्बूर्

-१-

अङ्कणस्थितादाम्रात् प्रथमे फले च्युते
मातुरक्षिभ्यां क्षणादपतत् तप्तोदकम्।

पञ्चषण्मासात्पूर्वं लिप्सया प्रतीक्षिते
बालमाकन्दे सुमप्रसवे प्रवर्त्तिते।

वत्सलात्मजो मातुः कुतुकात् तस्मादेकं
स्तबकं धृत्वाह्लादादन्तिकं सम्प्राप्तवान्।

रुषया मातावदत्- "फुल्लितं गुच्छं शिशो!
लीलया त्वया खल! भञ्जितं कष्टं कष्टम्।

पतिते चूते क्षणात् स्वीकर्तुं योग्यो भवान्
मञ्जरीं लुनात्यहो! ताडनव्यथाभावात्।"

मातुराक्षेपं श्रुत्वा पुत्रस्य मुखाम्भोजं
निष्कलं तप्ताश्रुभिर्वैवर्ण्यमासीत् क्षणात्।

माकन्दं समाहर्तुं नागमिष्यामीत्युक्त्वा
स्तबकं पुत्रोक्षिपत् सुन्दरं भूमौ शुचा।

भाषणं यथायोग्यं कर्तुमप्राप्त! शिशो!
दीर्घदर्शनं कर्तुं समर्थो दैवज्ञोसि।

-२-

ग्रीष्ममार्ताण्डांशुभिर्माकन्दे मरतकं
काञ्चनसौगन्धिकं समभूत् तस्मात्पूर्वम्।

माकन्दं समाहर्तुं नोत्सुको भूत्वा मातुः
स्नेहभाजनं शिशुरगच्छत् सुरालयम्।

नन्दनोद्याने देवपादपच्छायास्वयं
नन्दनः क्रीडालोलो विहरत्यस्मिन् काले।

अङ्कणस्थितादाम्रात् प्रथमे फले च्युते
मातुरक्षिभ्यां क्षणादपतत् तप्तोदकम्। (युग्मकम्)

स्वात्मजायात्यादरममृतं प्रदातुं तद्-
पादपाच्च्युते फले ह्यङ्कणे वृथा स्थिते।

प्रातिवेशिके गृहे बालकाः सोत्साहं त-
दाम्रमूलेषु क्रीडावेश्मानि रचयन्ति।

'चिक्रोडशिशोस्मभ्यं माकन्दफलं स्नेहाद्
यच्छतु'- इत्यामोदैरुच्चरन्त्युच्चैस्तरम्।

पतितं पक्वं फलमनुधावनं कृत्वा
तत्क्षणं स्वीकुर्वन्ति मङ्गलध्वानैस्सदा।

वासन्तमहोत्सवं सर्वेषु बालेष्वद्य
हा हन्त! तस्यास्तु तप्ताश्रुभिर्वर्षाकालम्।।

-३-

पुरतो माकन्दस्य संस्थिता कञ्चित्कालं
दुरितफलोपमं तत्फलं स्वीकुर्वती।

भौतिकं देहं यत्र पुत्रस्य प्रच्छादितं
तस्य गर्तस्योपरि निक्षिप्य स्वयमूचे।

“आगतमेतत्फलं सत्यमज्ञात्वा वत्स !
हस्तलालनं तव चुम्बनमनुभोक्तुम्।

नीरसभावेनेह मामपि त्यक्त्वा शिशो !
गतवान् तथाप्येतत् खादतु प्रियार्थं मे।

आगच्छ दिदृक्षामि मत्सुत ! हृच्चक्षुभ्यां
तरसा ह्यास्वाद्यतां प्राभृतं मया दत्तम्।”

तत्क्षणं मन्दानिलरूपिणा तत्पुत्रेण
प्रस्फुटमाश्लिष्टा सा ह्यन्वभूत् सुखं माता।।

...... ...... .....